स तु निरृतिदेवताकः । इति ज्योतिस्तत्त्वम् ॥ सिंहपुच्छाकारः । इति मुहूर्त्तचिन्तामणिः ॥ शुक्लमूर्त्तिर्नवतारामयश्च । अस्मिन् मस्तकोपयुदिते मीनलग्नस्याष्टौ पलानि गतानि भवन्ति । यथा,—

"मौलिभाजि नवतारकाञ्चिते
मूलभे सुतनु ! शुक्लमूर्त्तिनि ।
लिप्तिकाष्टकमराजकुम्भके
निर्जगाम पृथुरोमलग्नतः ॥"

इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥

अस्मिन् नक्षत्रे जातस्य फलम् ।

"मूलं विरुद्धावयवं समूलं
कुलं दहत्येव वदन्ति सन्तः ।
चेदन्यथातः पुरुषा विशेषात्
सौभाग्यमायुश्च कुलाभिवृद्धिः ॥"

इति कोष्ठीप्रदीपः ॥

अस्मिन् मांसभक्षणनिषेधो यथा,—

"चित्रासु हस्तामघयासु तैलं
क्षौरं विशाखाप्रतिपत्सु वर्ज्यम् ।
मूले मृगे भाद्रपदासु मांसं
योषिन्मघाकृत्तिकयोत्तरासु ॥"

इति तिथ्यादितत्त्वम् ॥

मूलकं, क्ली, पुं, ( मूल+संज्ञायां कन् । ) कन्दविशेषः । मूला इति भाषा । तत्पर्य्यायः । राजालुकः २ महाकन्दः ३ हस्तिदन्तकः ४ । इति हारावली । नीलकण्ठम् ५ मूलाह्वम् ६ दीर्घमूलकम् ७ अत्र दीर्घपत्रकमपि पाठः । मृत्क्षारम् ८ कन्दमूलम् ९ हस्तिदन्तम् १० सितम् ११ शुक्लमूलम् १२ हरितपर्णम् १३ रुचिरम् १४ दीर्घकन्दकम् १५ कुञ्जरक्षारमूलम् १६ । अस्य गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । कटूष्णताग्निदीपकत्वम् । दुर्नामगुल्महृद्रोगवातनाशित्वम् । रुचिदत्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अपि च ।

"बालमूलकपत्री तु रोचनी वह्निदीपनी ।
मूलकं गुरु विष्टम्भि तीक्ष्णमामं त्रिदोषकृत् ॥
तदेव स्निग्धसिद्धन्तु पित्तघ्नं कफवातजित् ।
शुष्कं त्रिदोषशमनं शोषघ्नं गरजित्तु ॥
तत्पुष्पं कफपित्तघ्नं तत्फलं कफवातजित् ॥"

इति राजवल्लभः ॥

अन्यच्च ।

"मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम् ।
शालामर्कटकं विस्रं शालेयं मरुसम्भवम् ॥
चाणक्यमूलकं तीक्ष्णं तथा मूलकपोतिका ।
नेपालमूलकञ्चान्यत्तद्भवेद्गजदन्तवत् ॥
लघुमूलकमुष्णं स्याद्धृद्यं लघु च पाचनम् ।
दोषत्रयहरं स्वर्य्यं ज्वरश्वासविनाशनम् ॥
नासिकाकण्ठरोगघ्नं नयनामयनाशनम् ।
महत्तदेवरूक्षोष्णं गुरु दोषत्रयप्रदम् ।
स्नेहसिद्धं तदेव स्याद्दोषत्रयविनाशनम् ॥"

इति भावप्रकाशः ॥

( तथाचास्य गुणाः ।

"बालं दोषहरं वृद्धं त्रिदोषं मारुतापहम् ।
स्निग्धसिद्धं विशुष्कन्तु मूलकं कफवातजित् ॥"

इति चरके सूत्रस्थाने । २७ अध्यायः ॥ )

क्षीरमाषे तद्भक्षणे दोषो यथा,—

"मकरे मूलकञ्चैव सिंहे चालाबुकन्तथा ।
कार्त्तिके सूरणञ्चैव सद्यो गोमांसभक्षणम् ॥"

इति कर्म्मलोचनम् ॥

पौषमास्यान्तमावस्यामुपक्रम्य ।

"पितॄणां देवतानाञ्च मूलकं नैव दापयेत् ।
दद्यन्नरकमाप्नोति भुञ्जीत ब्राह्मणो यदि ॥
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणं व्रतम् ।
अन्यथा याति नरकं क्षत्रो विट् शूद्र एव च ॥
तथा ।
"वरं भक्ष्यमभक्ष्यञ्च पिबेद्वा गर्हितञ्च यत् ।
वर्ज्जनीयं प्रयत्नेन मूलकं मदिरासमम् ॥"

इति मलमासतत्त्वम् ॥

मूलकः, पुं, ( मूले जातः । मूल+"पूर्व्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन् ।" ४ । ३ । २८ । इति वुन् । ) चतुस्त्रिंशत्स्थावरविषजात्यन्तर्गतविषभेदः । इति हेमचन्द्रः । ४ । २६८ ॥ (मूलप्रकार इति । मूल+"स्थूलादिभ्यः प्रकारवचने कन् ।" ५ । ४ । ३ । इति कन् । मूलस्वरूपः । यथा, भागवते । ९ । ९ । ४१ ।
"नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् ॥")

मूलकपर्णी, स्त्री, ( मूलकस्य पर्णमिव समानस्यादं पर्णमस्याः । ङीष् ।) शोभाञ्जनः । इति रत्नमाला ॥

मूलकर्म्म, क्ली, (मूलञ्च तत् कर्म्म चेति ।) औषध्यादिमूलेन यत् वशमोच्चाटनस्तम्भनवशीकरणादिकर्म्म । जो इति ख्यातम् । इति भरतः ॥ टोना इति मुकुटः ॥ तत्पर्य्यायः । कार्म्मणम् २ । इत्यमरः । ३ । २ । ४ ॥ जनपदाशद्युपपातकान्तर्गतोपपातकविशेषः । यथा,—

"सर्व्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम् ।
हिंसौषधीनां स्त्र्याजीवोऽभिचारो मूलकर्म्म च ॥"

इति मनुः । ११ । ६४ ॥

"मन्त्रौषधादिना वशीकरणम् ।" इति मूलकर्म्मशब्दव्याख्यायां कुल्लूकभट्टः ॥

मूलकमूला, स्त्री, (मूलकमिव मूलमस्याः ।) चीरकाकुलीदन्ता: । इति रत्नमाला ॥

मूलकारः, पुं, (मूलं करोतीति । कृ+कर्म्मण्यण् । इत्यण् ।) मूलग्रन्थकर्त्ता । यथा । नायं मतकारः किन्तु मूलकारः । इति संक्षिप्तसारटीकायां गोयीचन्द्रः ॥

मूलकारिका, स्त्री, ( मूलकारक+स्त्रियां टाप् । अकारस्येत्वम् । ) चुल्ली । इति हारावली ॥ मूलग्रन्थार्थप्रकाशकपद्यम् । मूलधनस्य वृद्धिविशेषश्च ॥

मूलकृच्छ्रं, क्ली, ( मूलेन तद्रसपानेन कृच्छ्रम् । ) एकादशविधपर्णकृच्छ्रान्तर्गतव्रतविशेषः । यदा कथितानि हृद्यमूलानि मासं पीयन्ते तदा मूलकृच्छ्रव्यपदेशं लभते । यथाह मार्कण्डेयः ।

"फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः ।
श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैरपरस्तथा ॥
मासेनामलकैरेवं श्रीकृच्छ्रमपरं स्मृतम् ।
पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते ॥
मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु ॥"

इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

( पुंलिङ्गोऽप्ययं मार्कण्डेयपुराणोक्तत्वात् । )

मूलजं, क्ली, (मूलात् जायते इति । जन+डः ।) आर्द्रकम् । इति राजनिर्घण्टः ॥ ( विशेषोऽस्यार्द्रकशब्दे ज्ञातव्यः ॥ )

मूलजः, पुं, ( मूलाद् जायते । जन+डः । ) उत्पलादिः । इति हेमचन्द्रः । ४ । २६६ ॥ मूलोद्भवे त्रि ॥

मूलत्रिकोणं, क्ली, ( मूलञ्च तत्त्रिकोणञ्चेति । ) अर्कादिग्रहाणां राशिरूपगृहविशेषः । स तु रवेः सिंहः । चन्द्रस्य वृषः । कुजस्य मेषः । बुधस्य कन्या । गुरोर्धनुः । भृगोस्तुला । शनेः कुम्भः । यथा,—

"सिंहो वृषश्च मेषश्च कन्या धन्वी तुला घटः ।
अर्कादीनां त्रिकोणानि मूलानि राशयः क्रमात् ॥"

अथ मूलत्रिकोणांशव्यवस्था ।

"रविभौमजीवभार्गवशनैश्चराणां त्रिकोणभागाः स्युः ।
नखरविदिक्तिथिनखरा इन्दोर्दिग्भांशका सचात् ॥"

इति ज्योतिस्तत्त्वम् ॥

मूलदेवः, पुं, ( मूलश्चासौ देवो राजा चेति । ) कंसराजः । इति त्रिकाण्डशेषः ॥

मूलद्रव्यं, क्ली, (मूलञ्च तद्द्रव्यञ्चेति ।) मूलधनम् । इति हेमचन्द्रः । ३ । ५३३ ॥

मूलधनं, क्ली, (मूलञ्च तद्धनञ्चेति ।) आदिद्रव्यम् । पुँजी इति भाषा । तत्पर्य्यायः । परिपणम् २ नीवी ३ । इत्यमरः । २ । ९ । ८० ।

मूलपर्णी, स्त्री, (मूले पर्णमस्याः । ङीष् ।) मण्डूकपर्णी । इति रत्नमाला ॥

मूलपुष्करं, क्ली, ( मूले पुष्करमस्य । पुष्करमिव मूलमस्येति वा । ) पुष्करमूलम् । इति राजनिर्घण्टः ॥

मूलपोती, स्त्री, ( मूलप्रधाना पोती । ) पूतिकाशाकभेदः । तत्पर्य्यायः । क्षुद्रवल्ली २ पोतिका ३ क्षुद्रपोतिका ४ क्षुद्रोपोदकनाम्नी ५ वंशशाकटपोतिका ६ । अस्या गुणाः । त्रिदोषघ्नत्वम् । रुच्यत्वम् । बल्यत्वम् । लघुत्वम् । मलपुष्टिकारित्वम् । रुच्यत्वम् । जठरानलदीपनत्वञ्च । इति राजनिर्घण्टः ॥

मूलप्रकृतिः, स्त्री, ( मूला चासौ प्रकृतिश्चेति । ) आद्या शक्तिः । यथा,—

"सर्व्वप्रसूता प्रकृतिः श्रीकृष्णः प्रकृतेः परः ।
न शक्तः परमेशोऽपि तां शक्तिं प्रकृतिं विना ।